THE SANSKRIT JOURNAL



THE

Durga Chandrakalä Stuti.

OF

Appayya Dikshit.

EDITED BY

P. A. Ramaswami Sastri,

Sanskrit Pandit, Mission School, Pudukkottai.

Printed at

THE SRI VIDYA PRESS, KUMBAKONAM.

Price Annas 4.

THE TITLE PAGE AND THE PREFACE HAVE BEEN PRINTED

AT THE SRI VIJAYA RENGA VILASA PRESS,

PUDUKKOTTA'.

॥ ओं ॥

शिवेपाहि ।

॥ दुर्गाचन्द्रकलास्तुतिः ॥

वेधोहरीश्वरस्तुत्यां विहर्त्रीं विन्ध्यभूधरे ।
हरप्राणेश्वरीं वन्दे हन्त्रीं त्रिपुरविद्विषाम् ॥ १ ॥

श्रीदेवीमाहात्म्यवराहपुराणहरिवंशभागवतादिप्रतिपन्नदेवीमहिमसञ्जिघृक्षया इदं स्तोत्रमारिप्सितं तत्र । सावर्णिस्सूर्यतनयो यो मनुः कथ्यतेऽष्टमः । निशामय तदुत्पत्तिं विस्तराद्गदतो मम । इति देवीमाहात्म्यस्य प्रथमश्लोके भुवनेश्वरीमन्त्रमुद्धार्यं विवक्षितं व्याचक्षते तद्यथा यो यकारस्याष्टमो हकारः तस्य विशेषणं सूर्यतनयः अग्निः तेजस्वित्वेन तन्नेदिष्ठत्वात् तेन तद्बीजं रेफो लभ्यते तद्वत्त्वं हकारस्य पुनर्लक्षणयोच्यते सवर्णा लोहितशुक्लकृष्णवर्णसहिता प्रकृतिः तस्यापत्यवत्तत्सम्बधी तद्वाचक ईकारः इहापि तद्वत्त्वं लक्षणयोच्यते एवं रेफेण ईकारेण च युक्तो हकारात्मको मनुर्मन्त्रः तत्प्रतिपाद्यदेवता कथ्यते तस्याः मन्त्रतत्प्रतिपाद्यदेवताया उत्पत्तिं निशामयेति सम्बन्धः मन्त्रस्याग्रिमो बिन्दुस्तु श्लोके स्वरूपत एव निवेशित इति तां शैलीमनुसृत्यात्रापि श्लोके तस्य मन्त्रस्योद्धारः पादचतुष्टयेऽपि कार्यो विवक्षितः अत्रानुलोम्येनैव हकारादीनामुच्चारः वेधःकृता देवीस्तुतिर्देवीमहात्म्ये प्रसिद्धा हरिकृता हरिवंशे ईश्वरकृता वराहपुराणे ॥ १ ॥

अभ्यर्थनेन सरसीरुहसम्भवस्य
त्यक्त्वोदिता भगवदक्षिपिधानलीलाम् ।
विश्वेश्वरी विपदपागमने पुरस्ता-
न्माता ममास्तु मधुकैटभयोर्निहन्त्री ॥ २ ॥

अनेन श्लोकेन देवीमाहात्म्यस्य प्रथमाध्यायेन प्रतिपादितं मधुकैटभवधरूपं देव्याः प्रथमचरितं संगृहीतं भगवत्कृतेऽपि मधुकैटभवधे माणवक-

कर्तृके आचार्येण कार्यमाणे ऽध्ययने कारीषाग्नेरिव तत्सामर्थ्याचरणेन साक्षात्तत्तत्प्रेरणेन च देव्याः प्रेरकत्वमस्तीमि मधुकैटभयोर्निहन्त्रीत्युक्तं देवी हरिं प्रति बोधं नीत्वा मधुकैटभयोर्वधे समर्थं कृतवती तस्य तयोर्वधे भावश्चोत्पादितवतीति देवीमाहात्म्ये ब्रह्मस्तुतिगताद्वचनात् ज्ञायते । प्रबोधञ्च जगत्स्वामी नीयतामुच्युतो लघु । बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ । इति अक्षिपिधानलीलामित्यनेन भगवतो योगनिद्रान्येषां निद्रेव मोहपारवश्यापादिनी न भवति । किन्तु लीलया सखीव लोचनपिधानमात्रं करोतीति दर्शितं तदुक्तं हरिवंशे । याप्येषा गह्वरी माया निद्रेति जगति स्थिता । सा कर्मान्वेषिणी घोरा काळरात्री महीपते । अस्यास्तनुस्तमोद्वारा निशादिवसनाशिनी । जीविताद्धहरी घोरा सर्वप्राणभृतां भुवि । नैतया कश्चिदाविष्टो जृम्भमाणो मुहुर्मुहुः । शक्तः प्रसहितुं वेगं मज्जान्निव महार्णवे । अन्नजा भुवि मर्त्यानां श्रमजा वा कथञ्चन । नैशा भवति लोकस्य निद्रा सर्वस्य लौकिकी । सुप्तान्ते क्षीयते ह्येषा प्रायशो भुवि देहिनां । मृत्युकालाभिभूतानां प्राणान् स्वापयते भृशं । देवेष्वपि दधारैनां नान्यो नारायणादृते । सखी सार्वरहस्येषा माया विष्णोश्शरीरजा । सैषा नारायणमुखे दृष्टा कमललोचना । लोकानल्पेन कालेन भजते भृशमोहिनी । इति ॥२॥

> प्राङ्निर्जरेषु निहितैर्निजशक्तिलेशै-
> रेकीभवद्भिरुदिताखिललोकगुप्त्यै ।
> संपन्नशस्त्रनिकरा च तदायुधस्थै-
> र्माता ममास्तु महिषान्तकरी पुरस्तात् ॥ ३ ॥

अनेन श्लोकेन द्वितीयादिभिस्त्रिभिरध्यायै प्रतिपादितं देव्या मध्यमचरितं सङ्गृहीतं । अत्र यद्यपि द्वितीयेऽध्याये ब्रह्मविष्णुशिवानामिन्द्रादीनाञ्च शरीरान्निष्क्रान्तन्तेजस्सर्वं देवीविग्रहरूपेणाभिव्यक्तमासीदित्येतावदेवोक्तं देव्याश्च शूलादीन्यायुधानि देवैस्स्वस्वशूलेभ्यो विनिर्गमय्य दत्तानीत्येवोक्तं तथाप्युत्तरचरित्रगतवचनान्तरपर्यालोचनया देव्याश्शक्त्यंशा एव तत्तद्देव-

पालनीयैकदेशपालनशक्तित्वेन देव्या निवेशिताः त एव महिषासुरवधेन सर्वलोकसंरक्षणार्थं विहिताः एवन्तदायुधनिवेशितनिजशक्त्यंशा अपीति ज्ञायते तत्र हि। ब्रह्मेशगुहविष्णूनां तथैवेन्द्रस्य शक्तयः। शरीरेभ्यो विनिष्क्रम्य तद्रूपाश्चण्डिकां ययुः। यस्य देवस्य यद्रूपं भूषणं वाहनं यथा। तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ। इत्यादिना ब्रह्मादिशरीरनिर्गताभिः ब्राह्म्यादिशक्तिभिरपि युद्धमुपक्रम्य। बलावलेपाद्दुष्टे त्वं मा दुर्गे गर्वमावह। अन्यासां बलमाश्रित्य युध्यसेत्वतिमानिनि। इति सुम्भेनोक्ते देव्या वचनमाम्नायते। एकैवाहं जगत्यत्र द्वितीया का ममापरा। पश्यतां दुष्ट मय्येव विशन्त्यो मद्विभूतयः। इति। ततस्समस्तास्ता देव्यो ब्रह्माणी प्रमुखा लयं। तस्या देव्यास्तथा जग्मुरेकैवासीत्तदम्बिका। इत्युक्त्वा पुनर्देवीवचनमाम्नायते। अहं विभूत्या बहुभिरिह रूपैर्यदा स्थिता। तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरोभव। इति॥ ३॥

प्रालेयशैलतनयातनुकान्तिसम्प-
त्कोशोदिता कुवलयच्छविचारुदेहा।
नारायणीनमदभीप्सितकल्पवल्ली
सुप्रीतिमावहतु सुम्भनिसुम्भहन्त्री॥ ४॥

अनेन श्लोकेन पञ्चमाध्यायप्रभृतिभिष्षड्भिरध्यायैः प्रतिपादितस्य सभृत्यबान्धवसुम्भनिसुम्भवधरूपस्य देव्या उत्तरचरितस्यार्थस्संगृहीतः। देवीमाहात्म्ये सुम्भनिसुम्भहन्त्री कौशिकी सिद्धवत्कृत्य वर्णिता विशिष्य तदाविर्भावो न वर्णितः। स तु शिवपुराणे वायुसंहितायां वर्णितः। तत्र हि। दैत्यौ सुम्भनिसुम्भाख्यौ भ्रातरौ तौ बभूवतुः। ताभ्यां तपोबलाद्दत्तं ब्रह्मणा परमेष्ठिना। अवध्यत्वं जगत्यस्मिन्पुरुषैरखिलैरपि। अयोनिजा तु या कन्या ह्यम्बिकाकोशसमुद्भवा। अजातपुंस्पर्शरतिरतिलंघ्यपराक्रमा। तयास्तु नौ वधस्संख्ये तस्यां कामाभिभूतयोः। इति चाभ्यर्थितो ब्रह्मा ताभ्यां प्राह तथास्त्विति। ततःप्रभृति शक्रादीन्विजित्वा समरे सुरान्। निस्स्वाध्याय-

वषट्कारं जगच्चक्रतुरक्रमात् । तयोर्लयाय देवेशं ब्रह्मा प्रार्थितवान्पुनः । विनिन्द्यापि रहस्यम्बां क्रोधयित्वा यथा तथा । तद्वर्णकोशजां शक्तिमकामां कन्यकात्मिकाम् । निसुम्भसुम्भयोर्हन्त्रीं सुरेभ्यो दातुमर्हसि । इत्थमभ्यर्थितो धात्रा भगवान्नीललोहितः । काळीत्याह रहस्यम्बां निन्दयन्निव सस्मितः । इति प्रक्रम्य । वाचा नभिरता भर्तुरपि सर्वाङ्गसुन्दरी । सा वृथैवाभिजायेत सर्वैरपि गुणोत्तरैः । भर्तृभोगैकशेषा हि सर्ग एवैष योषिताम् । तथा सत्यन्यथा भूता नारी कुत्रोपयुज्यते । इत्यादि देवीवचनमुपन्यस्य क्रीडार्थं काळीत्युक्तमिति देवेनोक्ते। भूयसीव तवाप्रीतिरगौरामिति मे वपुः। क्रीडोक्तीरपि काळीति घटते कथमन्यथा । इति । पुनर्देवीवचनमुपन्यस्य कथञ्चिद्देवस्यानुज्ञया देवीगतमाश्रमं प्राप्य कञ्चित्कालं तपश्चरित्वा रजोगुणाधिपाद्ब्रह्मणो देवी गौररूपं प्राप्य नीलरूपकोशमुत्सृष्टवती ततः कोशादुद्भूता कौशिकीत्युक्तम् । तत्कोशं सहसोत्सृज्य गौरी सा समजायत । तत्कोशादात्मनोत्सृष्टात्कौशिकी नाम नामतः । काळी काळाम्बुदप्रख्या कन्यका समपद्यत । सा तु मायात्मिका शक्तिर्योगनिद्रा तु वैष्णवी । शङ्खचक्रत्रिशूलादि सायुधाष्टमहाभुजा । सौम्या घोरा च मिश्रा च त्रिणेत्रा चन्द्रशेखरा । अजातपुंस्पर्शरतिरधृष्या चातिसुन्दरी । इति । प्रत्यागतया देव्या देवं प्रति कौशिकीमहिमा कथित इति च तत्रैवोक्तम् । किं देवेन न सा दृष्टा या सृष्टा कौशिकी मया । तादृशी कन्यका लोके न भूता न भविष्यति । तस्या वीर्यं बलं विन्ध्ये निलयं विजयं तथा । सुम्भस्य च निशुम्भस्य मारणञ्च रणे तया । प्रत्यक्षफलदानञ्च लोकाय भजते सदा । देवानां रक्षणञ्चैव ब्रह्मा विज्ञापयिष्यति । इति ॥ ४ ॥

विश्वेश्वरीति महिषान्तकरीति यस्या-
नारायणीत्यपि च नामभिरङ्कितानि ।
सूक्तानि पङ्कजभुवा च सुरर्षिभिश्च
दृष्टानि पावकमुखैश्च शिवां भजेताम् ॥ ५ ॥

प्रथमाऽध्याये ब्रह्मणा कृतं स्तोत्रं तेन दृष्टं तत् । विश्वेश्वरीं जगद्धात्रीं इति विश्वेश्वरीनाम्नोपक्रमात् चतुर्थाध्याये यत् स्तोत्रं महिषासुरवधानन्तरं देवैरिन्द्रादिभिः कृतं तद्देवैर्महर्षिभिश्च दृष्टम् । देव्या यया ततमिदं जगदात्मशक्त्या निश्शेषदेवगणशक्तिसमूहमूर्त्या । तामम्बिकामखिलदेवमहर्षिपूज्याम् । इति स्तोत्रप्रथमश्लोके ऽखिलदेवमहर्षिपूज्यत्वविशेषणात् । ततस्सुरगणास्सर्वे देव्या इन्द्रपुरोगमाः । स्तुतिमारेभिरे कर्तुं निहते महिषासुरे । इति स्तोत्रोपक्रमे तत्र देवान् प्रति स्तोत्रत्रयफलप्रतिपादके देवीवचने । युष्माभिस्तु तयो याश्च याश्च ब्रह्मर्षिभिः कृताः । ब्रह्मणा च कृता याश्च प्रयच्छन्ति शुभां गतिम् । इति ब्रह्मर्षीणां स्तुतिकर्तृत्वस्य च प्रतिपादनाच्च तन्महिषान्तकरीसूक्तं सुम्भवधानन्तरमेकादशाध्याये । देव्या हते तत्र महासुरेन्द्रे सेन्द्रास्सुरा वह्निपुरोगमास्ताम् । कात्यायनीं तुष्टुवुरिष्टलाभाद्विकासिवक्त्राब्जविकाशिताशाः । इति । देवि प्रपन्नार्ति हरे प्रसीद । इत्यादि यदग्निप्रमुखैर्देवैः कृतं स्तोत्रन्तत्तैरेव दृष्टं तन्नारायणीसूक्तं तत्र । नारायणि नमोऽस्तु ते । इति बहुधाभ्यासात् त्रीण्यप्येतानि स्तोत्राणि अकृतकानादिस्तोत्ररूपाणि ब्रह्मादिभिर्दृष्टानि परन्नकृतैः कृतानीत्येतदग्निमपाञ्चरात्रवचनोदाहरणेन स्पष्टीभविष्यति ॥ ९ ॥

उत्पत्तिदैत्यहननस्तवनात्मकानि
संरक्षकाण्यखिलभूतहिताय यस्याः ।
सूक्तान्यशेषनिगमान्तविदः पठन्ति
तां विश्वमातरमजस्रमभिष्टवीमि ॥ ६ ॥

प्रथममध्यमोत्तरेषु त्रिष्वपि चरितेषु देव्या आविर्भावो दैत्यहननं स्तवनं चेति त्रयमाम्नायितम् । अतस्त्रीण्यपि प्रत्येकं त्रितयात्मकानि एतानि सर्वात्मना सर्वेषां संरक्षकाणीत्येतदेकादशाध्याये देव्यैव देवान् प्रति महता प्रपञ्चेन प्रतिपादितं तानि लोकरक्षणार्थं ब्रह्मविदः पठन्तीत्येतदग्निमपाञ्चरात्रवचनोदाहरणेन स्फुटीभविष्यति ॥ ६ ॥

यं वैप्रचित्तपुनरुत्थितसुंभमुख्यै-
दुर्भिक्षघोरसमयेन च कारितासु ।
आविष्कृतास्त्रिजगदार्तिषु रूपभेदा
स्तैरंबिका समभिरक्षतु मां विपद्भ्यः ॥७॥

एकादशाध्याये नारायणीस्तोत्रेण स्तुतया देव्या पुनरुत्थितसुंभनिसुंभवैप्रचित्तवधादिना लोकानुग्रहार्थं करिष्यमाणानन्दारक्तदन्तिकाद्यवतारा वर्णिताः तदर्थसङ्ग्रहोयं श्लोकः ॥७॥

सूक्तंयदीयमरविन्दभवादिदृष्ट-
मावर्त्य देव्यनुपदंसुरथस्समाधिः ।
द्वावप्यवापतुरभीष्टमनन्यलभ्य-
न्तामादिदेवतरुणींप्रणमामिदेवीम् ॥८॥

नमो देव्यै महादेव्यै शिवायै सततं नमः । इत्यादिकं सुम्भनिसुम्भवधार्थिभिर्ब्रह्मादिभिः कृतस्तोत्रं देवीसूक्तं तद्ब्रह्मादिभिर्दृष्टं तज्जपन्तौ सुरथसमाधिनामानौ राजवैश्यौ स्वसङ्कल्पितं फलमवापतुरिति त्रयोदशाध्यायार्थस्संग्रहीतः तत्र देवीसूक्तंपरञ्जपान्नित्यत्र देवीसूक्तमिहानुपदन्ताभ्यां श्रुतं नमोदेव्यादिकमेव विवक्षितः बुद्धिसन्निहितत्वात् तदेवं सप्तभिश्श्लोकैः कृते देवीमाहात्म्यतात्पर्यसङ्ग्रहे सतामसंशयार्थं पाञ्चरात्रलक्ष्मीतन्त्रवचनानि प्रदृश्यन्ते तत्रेमानि शक्रं प्रति श्रीमहालक्ष्मीवचनानि । महालक्ष्मीरहं शक्र पुनस्स्वायंभुवान्तरे । हिताय सर्वदेवानां जाता महिषमर्दिनी । मदीयाश्शक्तिलेशा ये तत्तद्देवशरीरगाः । संभूय ते ममाभूवन् रूपं परमशोभनं । आयुधानि च देवानां यानियानि सुरेश्वर । मच्छक्त्यस्तदाकारा आयुधानिममाभवन् । अभिष्टुता सुरैस्साहं महिषं जघ्नुषी क्षणात् । महिषान्तकरीसूक्तं सर्वसिद्धिप्रदं तदा । देव्यानयादिकं दिव्यं दृष्टं देवैस्सहर्षिभिः । उत्पत्तिं युद्धविक्रान्तिं स्तोत्रञ्चेति सुरेश्वर । कथयन्ति सुविस्तीर्णं ब्राह्मणा वेदपारगाः ।

लभन्ते च फलं शश्वदाधिपत्यमनश्वरं। योगनिद्राहरेर्युक्तायासा देवी दुरत्यया। महाकाळ्यास्तनुं विद्धि तां मां देवीं सनातनीं। मधुकैटभनाशार्थं मोहितौ च तया तदा। जघ्नाते वरलाभेन देवदेवेन विष्णुना। विश्वेश्वर्यादिकं सूक्तं दृष्टं तत् ब्रह्मणा तदा। स्तुतये योगनिद्राया मम देव्याः पुरंदर। एषा सा वैष्णवी माया महाकाळी दुरत्यया। स्तुत्या वशीकृता कुर्यात् वशे स्तोतुश्चराचरं। अस्या देव्यास्समुत्पत्तिश्चरितं स्तोत्रमित्यपि। हिताय सर्वभूतानां धार्यते ब्रह्मवादिभिः। तामसे त्वन्तरे शक्र महाविद्याभिधापरा। गौरीदेहात्समुद्भूता कौशिकीति तदा ह्यहं। वधाय दुष्टदैत्यानां तथा सुंभनिसुंभयोः। रक्षणाय च लोकानां जगतामुपकारिणी। मतीयाश्शक्तयो यास्ता देवश्रेष्ठशरीरगाः। तास्तत्तद्रूपधारिण्यस्साहाय्यं विदधुर्हि मे। ताभिर्निहत्य दैत्येन्द्रान् हन्तव्या ये तथा तया। संहृत्यात्मनि तास्सर्वामदीयाविपुषोऽखिलाः। अहं निजध्नुषी पश्चात्तयोः सुंभनिसुंभयोः। देवि प्रपन्नार्तिहरे प्रसीदेत्यादिकं तथा। नारायणीस्तुतिर्नाम सूक्तं परमशोभनं। स्तुतयो मे तदा दृष्टा देवैरग्निपुरोगमैः। एषा संपूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति। कौशिकी सर्वदेवेशी बहुकामप्रदा ह्यहं। उत्पत्तिर्युद्धविक्रांतिस्तुतिश्चेति पुरातनैः। पठ्यते त्रितयं विप्रैर्वेदवेदाङ्गपारगैः। वैवस्वते ऽन्तरे चोभौ पुनस्सुंभनिसुंभकौ। उत्पत्स्येते परोन्मत्तौ देवोपद्रवकारिणौ। नन्दगोपकुले जाता यशोदागर्भसम्भवा। तावहं नाशयिष्यामि सुनन्दा विन्ध्यवासिनी। पुनश्चाप्यतिरौद्रेण रूपेण पृथिवीतले। अवतीर्य हनिष्यामि वैप्रचित्तान्महासुरान्। भक्षयन्त्याश्च तानुग्रान्वैप्रचित्तांश्च दानवान्। रक्ता दन्ता भविष्यन्ति डाडिमीकुसुमोपमाः। ततो मां देवतास्वर्गे मर्त्यलोकेच मानवाः। स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकां। तस्मिन्देवान्तरे शक्र चत्वारिंशत्तमे युगे। सर्वतश्शतवार्षिक्यामनावृष्ट्यामनम्भसि। मुनिभिस्संस्मृता भूमौ सम्भविष्याम्ययोनिजा। ततश्शतेन नेत्राणां निरीक्षिष्या-

म्महं मुनीन् । कीर्तयिष्यन्ति शतशश्शताक्षीमिति मानवाः । तदाहमखिलं लोकमात्मदेहसमुद्भवैः । भरिष्यामि शुभैश्शाकैरावृष्टेः प्राणधारकैः । शाकम्भरीति मां देवास्तदा स्तोष्यन्ति वासव । तत्रैव च हनिष्यामि दुर्गमाख्यं महासुरं । दुर्गा देवीति विख्यातिं ततो यास्याम्यहं भुवि । शाकम्भरीं स्तुवन् ध्यायन् शक्र संपूजयन्नमन् । अक्षय्यमश्नुते भूतिमन्नपानोद्भवां रतिं । चतुर्युगे च पञ्चाशत्तमे मुनिभिरार्थिता । सुन्दरञ्चातिभीमञ्च रूपं कृत्वा हिमाचले । रक्षांसि भक्षयिष्यामि मुनीनान्त्राणकारणात् । ततो मां मुनयस्सर्वे स्तोष्यन्त्यानम्रमूर्तयः । भीमा देवी प्रसीदेति भीमामभयदायिनीं । युगे षष्टितमे कश्चिदरुणोनाम दानवः । मनुष्याणां मुनीनाञ्च महाबाधां करिष्यति । तत्राहं भ्रामरं रूपं कृत्वा संख्येयषट्पदा । त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरं । भ्रामरीति च मां लोके तदा स्तोष्यन्ति सर्वतः । इत्थं यदायदा बाधा दानवोत्था भविष्यति । तदा तदाऽवतीर्याहं हनिष्यामि महासुरान् । अमी ते लेशतश्शक्र दर्शिताः परमाद्भुताः । अवतारा निरातङ्का मदीयाः केवलाह्वयाः । एतेषां परमा प्रोक्ता कूटस्था सा महीयसी । महालक्ष्मीर्महाभागा प्रकृतिः परमेश्वरी । अमुष्यास्तुतये दृष्टं ब्रह्माद्यैस्सकलैस्सुरैः । नमो देव्यादिकं सूक्तं सर्वकामफलप्रदम् । इमां देवीं स्तुवन्नित्यं स्तोत्रेणानेन मामिह । क्लेशानतीत्य सकलानैश्वर्यमहदश्नुते । अमुष्यास्सावताराया महालक्ष्म्या ममानघ । जन्मानि चरितैस्सार्द्धं स्तोत्रैर्वैभवदायिभिः । कथितानि पुरा शक्र वसिष्ठेन महात्मना । स्वारोचिषेऽन्तरे राज्ञे सुरथाय महात्मने । समाधये च वैश्याय प्रणतायावसीदते । भक्तिश्रद्धावता नित्यं वसिष्ठेन कृतेति वै । हृदिस्थिता सदा सेयं जन्मकर्मावलीस्तुतिः । एतां द्विजमुखाच्छ्रुत्वा समधीयानो नरस्सदा । विधूय निखिलां मायां सम्यक् ज्ञानं समश्नुते । सर्वा सम्पदमाप्नोति धुनोति सकलापदः । मम प्रभावात्सौभाग्यं कीर्तिञ्चैव समश्नुते । इति ।

अत्र कूटस्था महालक्ष्मीः प्रथममध्यमोत्तरचरितदेवतात्रयसमष्टिरूपा सकलदेवीमाहात्म्यदेवता विवक्षिता। सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी। इति रहस्याध्यायेषु प्राधानिकाध्याये तस्यां महालक्ष्मीपदप्रयोगात्, नमो देव्यादि हि ब्रह्मादिभिः कृतं स्तोत्रं तस्यास्तोत्रमिति तामुद्दिश्य तपश्चरद्भ्यां सुरथसमाधिभ्यां तदेव सूक्तं जप्तमिति युज्यते। अत्र सकलदेवीमाहात्म्यप्रतिपाद्या महालक्ष्मीश्शिवशक्तिरम्बिकैव। सदाशिवाङ्कमारूढा शक्तिरिच्छाह्वया शिवा। महालक्ष्मीरिति ख्याता देवी सर्वगुणान्विता। इति। शिवपुराणे तस्यामपि महालक्ष्मीपदप्रयोगात्। श्रियंलक्ष्मीमौपलामम्बिकाङ्गाम्। इत्यायुष्यसूक्ते तस्यां लक्ष्मीपददर्शनेन तस्मिन्। सन्महत्। इत्यादिसूत्रेण पूजावाचिमहत्पदसमाससम्भवाच्च। न तु भगवच्छक्तिरिह महालक्ष्मीदुर्गायाश्शिवशक्त्यंशत्वस्य प्रसिद्धतरत्वात्। अतएव हरिवंशे शम्बरवधार्थं प्रद्युम्नाय शक्रेण प्रेषितं कवचं प्रद्युम्नाय दत्तवता नारदेन दुर्गया शम्बराय दत्तो मुद्गरः पार्वत्या दत्तइति व्यवहृतः। अस्य देवरिपोस्तात मुद्गरो नित्यपूजितः। पार्वत्या परितोषेण दत्तश्शत्रुनिबर्हणः। अजय्यश्चैव संग्रामे देवदानवमानवैः। तदस्त्रप्रतिघातार्थं देवीं स्मर्तुमिहार्हसि। स्तुत्या चैव नमस्या च महादेवी रणोत्सुकैः। तत्रैव क्रियतां यत्नस्संग्रामे रिपुणा सह। इति। अयञ्च मुद्गरो दुर्गया शम्बराय दत्त इति तदनन्तरं प्रद्युम्नकृतएव स्तोत्रे व्यक्तम्। यथा। नमस्ते सुम्भहननि निसुम्भहृदिदारिणि। काळरात्रिन्नमस्येऽहं कुमारीञ्चापि नित्यवत्। कान्तारवासिनीं देवीं नमस्येऽहं कृताञ्जलिः। श्रीविन्ध्यवासिनीं देवीं रणदुर्गां रणप्रियाम्। त्रिशूलिनीं नमस्यामि महिषासुरघातिनीम्। सिंहवाहां नमस्यामि सिंहप्रवरकेतनाम्। इति कामवचस्तुष्टा दुर्गा सुप्रीतमानसा। इत्यादि तदनन्तरसन्दर्भेणाप्येतद्व्यक्तम्। यत्तु लक्ष्मीतन्त्रविष्णुशक्तिरूपया लक्ष्म्या शक्रं प्रति स्वावतारभेदत्वमुक्तम्। तत्पार्वत्याभेदाभिप्रायं स्वमहिमख्यापनार्थमिति नेतव्यम् ॥ ८ ॥

अथ वाराहपुराणोक्तमहिमानं संगृह्णाति—

माहिष्मतीतनुभवश्च रुरुश्च हन्तु-
माविष्कृतैर्निजरसादवतारभेदैः ।
अष्टादशाहतनवाहतकोटिसंख्यै-
रम्बा सदा समभिरक्षतु मां विपद्भ्यः ॥९॥

एवं वाराहपुराणे कथा कदाचित्कैलासगिरौ पिनाकिन्यास्थानमास्थितवति चतुर्मुखस्समागत्य दैत्यबाधां तस्मै निवेदयामास । तदा नारायणोऽपि समागतः । तेषामन्योन्यं पश्यतां दृष्टिसमागमे काचन कन्या जज्ञे सा तेषां वचनात्स्वगुणैर्विभक्ता त्रिशरीरा बभूव । तत्र सात्त्विकी ब्रह्मणस्सृष्टिशक्तिस्सा तच्छरीरं प्रविष्टा । तदाप्रभृति तदीया सृष्टिर्ववृधे राजसी वैष्णवी पालनशक्तिः सा मन्दरेस्वसदृशसौन्दर्यशालिनीरष्टादशकोटिसंख्याः कुमारीस्सृष्ट्वा तत्र पुरीं निर्माय ताभिस्सह विहरमाणा स्थिता । तस्मिन् विप्रचित्तेस्तनयायां माहिष्मत्यां सिन्धुद्वीपं तपस्यन्तं तदाश्रमादपसार्य स्वयं तत्र सखीभिस्सह विहर्तुं महर्षिरूपमास्थाय तं भीषितवत्यां तेन महिष्येव भवेति शप्तायां सिन्धुद्वीपस्य विद्युमत्या दैत्यकन्याया दर्शनेन स्कन्नं शुक्लं पीतवत्यामुत्पन्नेन महिषासुरेण नारदप्रेरणया तां कामयमानेन प्रहितो दूतस्तस्याः प्रतिहार्या जययैव तिरस्कृतो युद्धार्थमागतो महिषासुरः तयाष्टादशकोटिसंख्यकन्यापरिवारसहितया विंशतिभुजया सिंहाधिरूढया निहतः, तामसी रौद्री संहारशक्तिः तस्यां नीलगिरौ स्थितायां समुद्रजलमध्ये पुरं निर्माय स्थितेन रुरुनाम्ना दैत्येन विद्रावितास्तामेव शरणं ययुः तस्यां हसन्त्यां वक्त्रात् नवकोटिसंख्या भीषणाकारा नानाविधायुधधरा देव्यो निर्ययुः ताभिस्सहितया तया समरे स दैत्यो निहतः इति इदं कथाद्वयमत्र संगृहीतम् ॥९॥

एतच्चरित्रमखिलं लिखितं हि यस्या-
स्संपूजितं सदन एव निवेशितं वा ।
दुर्गञ्च तारयति दुस्तरमप्यशेषं
श्रेयः प्रयच्छति च सर्वमुपासकानाम् ॥१०॥

अत्र वराहपुराणे वचनानि । य इदं शृणुयात्सर्गं त्रिशक्त्याः परमं शिवम् । सर्वपापविनिर्मुक्तः परन्निर्वाणमाप्नुयात् । यश्चैनं शृणुयाद्भक्त्या नवम्यां नियतस्थितः । स राज्यमतुलं लब्ध्वा भयेभ्यश्च प्रमुच्यते । यस्यैतल्लिखितं गेहे सदा तिष्ठति धारिणी । न तस्याग्निभयं घोरं सर्पचोरादिजं भवेत् । यश्चैतत्पूजयेद्भक्त्या पूजयेत् स्थापितं बुधः । तेन लब्धं भवेत्सर्वं त्रैलोक्यं स चराचरम् । जायन्ते पशवः पुत्रा धनधान्यं वरस्त्रियः । रत्नान्यश्वा गजा भृत्या ग्रामाश्चाशु भवन्त्युत । यस्येदं तिष्ठते गेहे तस्य सर्वमिदं भवेत् । इति ॥ १० ॥

यत्पूजनस्तुतिनमस्कृतिभिर्भवन्ति
प्रीताः पितामहरमेशहरास्त्रयो ऽपि ।
तेषामपि स्वकगुणैर्ददती वपूंषि
तामीश्वरस्य तरुणीं शरणं प्रपद्ये ॥ ११ ॥

इत्थं वराहपुराणे कथा वेत्रासुरेण वित्रासिता देवा ब्रह्माणं शरणं जग्मुः ब्रह्मा तदा गंगाजले निमज्य जपनिष्ठ स्थितः । देवानां त्राहित्राहीत्याक्रोशमाकर्ण्य चिन्तयतस्तस्मात् कन्यारूपा महामाया प्रादुर्बभूव सायुधाष्टमहाभुजा सा महादेवी जलान्निर्गत्य सिंहाधिरूढा सती वेत्रासुरं जघान ततो महेश्वरस्तां तुष्टाव तदानीं ब्रह्मा जलान्निर्गत्य । यस्तु सायं तथा प्रातरिदं स्तोत्रं पठिष्यति । त्वयेरितं महादेव तस्य देव्या समं भवेत् । वरदो भव देवेश सर्वापत्सूद्धरस्व तम् । इत्युवाच । त्वया देवि महत्कार्यं कर्तव्यश्चान्यदस्ति नः । भविष्यन्महिषाख्यस्य असुरस्य विनाशनम् । इति चोवाच । इति अत्र महेश्वरेण देवी स्तुतेति सन्तुष्टेन ब्रह्मणैवमुक्तमित्युक्तिभंग्या । नवम्याञ्च सदा पूज्या इयं देवी समाधिना । वरदा सर्वलोकाना भविष्यति न संशयः । नवम्यां यस्तु पिष्टाशी पूजयिष्यति मानवः । नारी वा तस्य संपन्नं भविष्यति मनोगतम् । इति ब्रह्मोक्त्या च देव्यास्तुत्यादिभिः ब्रह्मणः प्रीतिरवसीयतेमहेश्वरं प्रति ब्रह्मवचनेनैव देवीस्तुत्या महेश्वरस्य प्रीतिरवसीयते वराहपुराणे त्रिशक्तिनिर्णयावसानवचनैरपि तथावसीयते ता-

न्येवं पठ्यन्ते । नवकोट्यस्तु चामुण्डा भेदभिन्ना व्यवस्थिताः । या रौद्री तामसी शक्तिस्सा चामुण्डा प्रकीर्तिता । अष्टादश तथा कोट्यो वैष्णव्या भेद उच्यते । या सा तु राजसी शक्तिः पालनी सैव वैष्णवी । या ब्रह्म-शक्तिस्सत्वस्था सानन्ता वै प्रकीर्तिता । एतेषां सर्वभेदेषु पृथगेकैकशो-धरे । सर्वासां भगवान्रुद्रस्सर्वगत्वात्पतिर्भवेत् । यावन्त्यस्ता महाश-क्त्यस्तावद्रूपाणि शङ्करः । कृतवांस्तांश्च भजते पतिरूपेण सर्वदा । यश्चा-राधयते तास्तु तस्य रुद्रे तु तोषिते । सिध्यन्ते तास्तदा देव्यो मन्त्रिणो नात्र संशयः । इति देव्यास्तुस्त्या हरेः प्रीतिर्हरिवंशे । हरिणा प्रोक्तस्या-स्यास्तवस्यावसाने देवीं प्रति । ये च त्वां मत्प्रभावज्ञाः प्रणमिष्यन्ति मान-वाः । न तेषां दुर्लभं किञ्चित्पुत्रतो धनतो ऽपि वा । त्वान्तु स्तोष्यन्ति ये भक्त्या स्तवेनानेन सुव्रते । तस्याहं न प्रणश्यामि स च मे न प्रणासति । इति हरेरेव वचनेनावगम्यते । हरिवंशे । अनिरुद्धकृतदेवीस्तोत्रावसाने तु देव्या नामकीर्तनमात्रेण ब्रह्मादिकस्य सर्वस्य जगतः प्रीतिरुक्ता । ब्रह्मा विष्णुश्च शक्रश्च चन्द्रसूर्याग्निमारुताः । अश्विनौ वसवश्चैव धाता भूमिर्दि-शो दर्शाभगो नक्षत्रवंशाश्च ग्रहा नद्यो ह्रदास्तदा । सरितस्सागराश्चैव ना-नाविद्याधरोरगाः । तथा नागास्सुपर्णाश्च गंधर्वाप्सरसां गणाः । कृत्स्नं ज-गदिदं प्रीतं देव्या नामानुकीर्तनात् । इति । विष्णुपुराणे ऽपि । देवीस्तुत्या भगवतः प्रीतिरुक्ता । ये त्वामार्येति दुर्गेति वेदगर्भाम्बिकेति च । भद्रेति भद्रकाळीति क्षेम्या क्षेमकरेति च । प्रातश्चैवापराह्णे च स्तोष्यन्त्यानम्रमूर्त-यः । तेषां हि प्रार्थितं सर्वं मत्प्रसादाद्भविष्यति ॥ ११ ॥

कान्तारमध्यदृढलग्नतयावसन्ना-
मग्नाश्च वारिधिजले रिपुभिश्च रुद्धाः ।
यस्याः प्रपद्य चरणौ विपदस्तरन्ति
सा मे सदास्तु हृदि सर्वजगत्सवित्री ॥ १२ ॥

हरिवंशे देवीं प्रति भगवद्वचनानि । कान्तारेष्ववसन्नानां मग्नानां

च महार्णवे । दस्युभिर्वा निरुद्धानां त्वं गतिः परमा नृणाम् । इति तदर्थो ऽत्रानुसंगृहीतः ॥ १२ ॥

बन्धे वधे महति मृत्युभये प्रसक्ते
वित्तक्षये च विविधे च महोपतापे ।
यत्पादपूजनमिह प्रतिकारमाहु-
स्सा मे समस्तजननी शरणं भवानी ॥ १३ ॥

हरिवंशे देवीं प्रति भगवद्वचनानि । नृणां बन्धं वधं पुत्र भयं नाशं धनक्षयम् । व्याधिमृत्युभयञ्चैव पूजिता शमयिष्यसि । संग्रामेषु च सर्वेषु ह्यग्निप्रज्वलितेषु च । नदीतीरेषु घोरेषु कान्तारेषु भयेषु च । प्रवासे राजबन्धे च शत्रूणाञ्च प्रमर्दने । प्राणात्ययेषु सर्वेषु त्वं हि रक्षा न संशयः । इति वराहपुराणे महिषासुरवधानन्तरं ब्रह्मादिकृतस्तोत्रावसाने तेषां वचनानि । शरणं त्वां प्रपद्यन्ते ये देवीं परमेश्वरीम् । न तेषां जायते किञ्चिदशुभं रणसङ्कटे । सर्पव्याघ्रभये घोरे चोरराजभये तथा । निगळस्थो ऽपि बद्धश्च त्वां स्मरेद्यस्तु मानवः । सो ऽपि बन्धैर्विमुक्तस्स्यात्ससुखं वर्द्धते चिरं । इति ॥ १३ ॥

बाणासुरप्रहितपन्नगबन्धमोक्ष-
स्तद्बाहुदर्पदळनादुषया च योगः ।
प्राद्युम्निना द्रुतमलभ्यत यत्प्रसादा-
त्सा मे शिवा सकलमप्यशुभं क्षिणोतु ॥ १४ ॥

अनेन श्लोकेन संगृहीतमर्थजातं हरिवंशे नागपाशबन्धनानन्तरप्रवृत्तकथासन्दर्भसामर्थ्यादवगम्यते । तथाहि । तत्र बाणासुरप्रहितैर्नागपाशैर्बद्धमनिरुद्धं दृष्ट्वा तदर्थं कृष्णाय निवेदयितुं नारदे द्वारवतीं गतवति सति । नष्टो ऽयं दानवः क्रूरो युद्धं प्राप्य न संशयः । स गत्वा नारदस्तत्र शङ्खचक्रगदाधरम् । ज्ञापयिष्यति तत्वेन इममर्थं तथैव तत् । इत्यनिरुद्धस्य चिन्तनम् । किमर्थं भीरु मामैस्त्वं माभैषीश्शुभलोचने । पश्य सुश्रोणि सम्प्राप्तं मत्कृते मधुसूदनम् । यस्य शङ्खस्वनं श्रुत्वा बाहुशब्दं

बलस्य च । दानवा नाशमेष्यन्ति गर्भाश्चासुरयोषिताम् । इति तेन कृतमुषाश्वासनञ्चोपन्यस्ययत् । ततो देवीं स कौमारीं रक्षार्थं शरणं गतः । इत्युक्तं यच्चानिरुद्धेन कृतम् । महेन्द्रविष्णुभगिनीं नमाम्यात्महिताय वै । मनसा भावशुद्धेन शुचिस्तोष्ये कृताञ्जलिः । इत्यादि । त्वत्प्रसादादविघ्नेन क्षिप्रं मुच्येत बन्धनात् । अवेक्षस्व विशालाक्षि पादौ ते शरणं व्रजे । इत्यन्तम् । द्रौपदीवस्त्रहरणकाले । सौभवधव्यासङ्गेनेव केनचिन्महता देवकार्यसङ्गेन कृष्णस्येदानीमिहागमने विघ्नो माभूत् । शीघ्रमागत्य भगवानस्मान्बाणकृतात्तद्गृहे निरोधात्स्वात्मानं मोचयत्वित्येतदर्थञ्च देवी तु कृष्णेनैवानिरुद्धस्य नागपाशमोक्षः कार्यः इति देवकृतां मर्यादामन्वीक्ष्य तस्य वेदनापरिहाराय दृढं नागपाशबन्धं शिथिलीकृत्य शीघ्रं कृष्णागमननिवेदनेन तमाश्वासितवतीति तदनन्तरमुक्तम् । नागपाशेन बद्धस्य हृतस्योद्धतचेतसः । स्फोटयित्वा कराग्रेण पञ्जरं वज्रसन्निभम् । बद्धं बाणपुरे वीरमनिरुद्धमभाषत । सान्त्वयन्ती च सा देवी प्रसादाभिमुखी तदा । चक्रायुधो मोक्षयिता निरुद्ध त्वां बन्धनादाशु सहस्व कालम् । छित्वाशु बाणस्य च बाहुचक्रं पुरीं निजां नेष्यति दैत्यसूदन । इति । यत्तु तदनन्तरम् । नमोऽस्तु ते देवि वरप्रदा इति । इत्यादि । प्रियतां मे जगन्नाथशैलपुत्रि वसुन्धरे । त्रायस्व मां महादेवि नारायणि नमोऽस्तु ते । नमामि शिरसा देवीं बन्धनस्थो विमोचितः । इत्यन्तं पुनस्तवनं शीघ्रं मोचनीयोऽयमिति मयि कृष्णस्य प्रीतिमुत्पादयेति प्रार्थनार्थम् । भावश्च क्रियतामस्य हन्तुमेतौ महासुरौ । इति देवीमाहात्म्यगतब्रह्मकृतस्तोत्राम्नातवचनेन हि देव्याः भगवद्भावप्रेरकत्वमवगतम् ॥ १४ ॥

एवं प्राप्तां विपदं निवारयितुं भगवद्भावप्रेरणाय रुक्मिण्या कृतं देव्याराधनं संगृह्णाति—

पापः पुलस्त्यतनयः पुनरुत्थितो मा-
मद्यापि हर्तुमयमागत इत्युदीतम् ।

यत्सेवनेन भयमिन्दिरयावधूत-
न्तामादिदेवतरुणीं शरणं गतोऽस्मि ॥ १९ ॥

भगवते रुक्मिण्युद्वाहार्थं समागत्य कृताभ्युदयिकमनन्तरदिने रुक्मिणीमुद्वोढुमुद्युञ्जानं शिशुपालमन्वीक्ष्यन्त्याः प्रसह्य हरणार्थं कृष्णागमनं प्रतीक्षमाणाया रुक्मिण्याश्चिन्ता वर्णिता । भीष्मकन्या वरारोहा काङ्क्षन्त्यागमनं हरेः । प्रत्यापत्तिमपश्यन्ती द्विजं सा चिन्तयत्तदा । अहो त्रियामान्तरित उद्वाहो मे ऽल्पराधसः । नागच्छत्यरविन्दाक्षो नाहं वेद्म्यत्र कारणम् । सो ऽपि नावर्तते ऽद्यापि मत्सन्देशहरो द्विजः । अपि मय्यनवद्यात्मा दृष्ट्वा किञ्चित् जुगुप्सितम् । मत्पाणिग्रहणे नूनं नायाति ह्यकृतोद्यमः । दुर्भगाया हि मे धाता नानुकूलो महेश्वरः । देवी वा विमुखी गौरी रुद्राणी गिरिजा सती । ततः कृष्णाह्वानाय प्रेषिते ब्राह्मणे प्रत्यागत्य बलदेवसहितं कृष्णं समागतं निवेदितवति प्रहृष्टया रुक्मिण्या कृतं देवाराधनम् । कन्या-चान्तःपुरं प्रागाद्भटैर्गुप्ताम्बिकालयम् । पद्भ्यां विनिर्ययौ द्रष्टुं भवानीपादपल्लवम् । इत्युपक्रम्य इत्थं वर्णितम् । आसाद्य देवसदनं धौतपादकराम्बुजा । उपस्पृश्य शुचिश्शान्ता प्रविवेशाम्बिकान्तिकम् । तां वै प्रवयसो बालां विधिज्ञा विप्रयोषितः । भवानीं वन्दयाञ्चक्रुर्भवपत्नीं भवान्विताम् । नमस्ये त्वाम्बिके ऽभीक्ष्णं स्वसन्तानयुतं शिवम् । भूयात्पतिर्मे भगवान् कृष्णस्तदनुमोदताम् । इति अत्र कृष्णे स्वविवाहोत्कण्ठया समागतेऽपि यन्महत्या भक्त्या समाराधनपूर्वकमेवं प्रार्थनं कृतम् तत् कृष्णस्य स्वविषयप्रीतिस्थैर्यार्थं सम्भावितसकलविघ्ननिवारणार्थञ्चेति स्पष्टमेव यः पूर्वं लक्ष्म्यास्सीतावतारे हर्ता रावणः स एव शिशुपालो भूत्वा रुक्मिण्यवतारे तदुद्वाहार्थमागत इत्येतन्मूलं कृत्वा लक्ष्म्या उक्तप्रकारेण भयं श्लोके निबद्धं इदं रुक्मिण्या कृतं समाराधनं शिवगणपतिकार्तिकेयसहितभवानीरूपाया देव्याः न तु क्रियाशक्तिभवानदुर्गारूपायाः तथाप्यभेदात्तद्रूपानुसन्धानेन स्तोत्रं कृतम् ॥ १९ ॥

कृष्णपरिग्रहलाभार्थं गोपकन्याभिः कृतं दुर्गारूपेण देव्याराधनं भागवतोक्तं संगृह्णाति—

यध्यानजं सुखमवाप्यमनन्तपुण्यै-
स्साक्षात्तमच्युतपरिग्रहमाश्ववापुः ।
गोपाङ्गनाः किल यदर्चनपुण्यमात्रा-
त्सा मे सदा भगवती भवतु प्रसन्ना ॥ १६ ॥

दुस्सहप्रेष्ठविरहतीव्रतापधुताशुभाः । ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या-क्षीणमंगळाः । तमेव परमात्मानं जारबुध्यापि सङ्गताः । जहुर्गुणमयं देहं सद्यः प्रक्षीणकल्मषाः । इति भागवते । ध्यानप्राप्ताच्युताश्लेषनिर्वृतिरपि प्राचीनसकलशुभकर्मव्यतिरेकेणेत्युक्तं साक्षादेवाच्युतालिङ्गनादिस्तत्परिग्रहो देव्यर्चनपुण्यमात्रेण लब्ध इत्यपि भागवत एवोक्तं तत्रहि । हेमन्ते प्रथमे मासि नन्दव्रजकुमारिकाः । इत्युपक्रम्य । कात्यायनिमहामाये महायोगिन्य-धीश्वरि । नन्दगोपसुतं देवि पतिं मे कुरु ते नमः । इति मन्त्रं जपन्त्यस्ताः पूजां चक्रुः कुमारिकाः । एवं मासव्रतं चेरुः कुमार्यः कृष्णचेतसः । भद्र-काळीं समानर्चुर्भूयान्नन्दसुतः पतिः । इति कृष्णपरिग्रहलाभार्थं गोपकुमा-रीणां देव्या अर्चनमुक्त्वा ततः प्रसन्नेन कृष्णेन तथैव स्वपरिग्रहोऽङ्गीकृतः इति तदनन्तरमुक्तम् । सङ्कल्पो विदितस्साध्व्यो भवतीनां मदर्चनम् । मया-नुमोदितस्सोऽसौ सत्यो भवितुमर्हति । यात बाला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः । यदुद्दिश्य व्रतमिदं चेरुरार्यार्चनं सतीः । इति अत्रार्यार्चन-मेव भगवदर्चनमिति व्यवहृतम् । आर्यार्चनेन भगवत्प्रीतेः हरिवंशादिवच-नोदाहरणेन प्राक्प्रपञ्चितत्वात् ॥

अथ सामगानां सामविधिब्राह्मणोक्तप्रकारेण देव्या मुक्तिप्रदत्वं दर्शयति—

रात्रिं प्रपद्य इति मन्त्रविदः प्रपन्ना-
नुद्बोध्यमृत्यवधिमन्यफलैः प्रलोभ्य ।
बुध्वा च तद्विमुखतां प्रतनयन्ती-
माकाशमादिजननीं जगतां भजेताम् ॥ १७ ॥

तद्वायत्र्यर्थस्य कन्यां कुमारिणीमित्यत्र प्रत्यभिज्ञानात् रात्र्यादिपदानां तत्रान्वयोपपत्तेश्च रात्रिरूपा हि सा । अस्यास्तनुस्तमोद्वारा निशादिवसनाशिनी । इति देवीमधिकृत्य हरिवंशोक्तेः पुनर्भूश्च असुरवधार्त्थं नानावतारपरिग्रहात् । अतएव मयोभूः प्राणिनां सुखस्य सम्पादयित्री कन्याच । अजातपुंस्पर्शरतिरधृष्या चातिसुन्दरी । इति तामधिकृत्य शिवपुराणोक्तेः शिखण्डिनी मयूरकलापभूषणवती मयूरकलापध्वजवती वा हरिवंशे कृष्णवाक्येषु । शशिरश्मिप्रकाशेन हारेणोरसि राजिता । दिव्यकुण्डलपूर्णाभ्यां श्रवणाभ्यां विभूषिता । इति देवीवर्णनं प्रस्तुत्य । अङ्गजेन मयूराणामङ्गदेन च भास्वरा । ध्वजेन शिखिबर्हाणामुच्छ्रितेन समावृता । इत्युक्तत्वात् । असुरबन्धनार्थं पाशहस्ता च नित्ययुवतिः; बाल्यवार्द्धकावस्थारहिता च कंसमोहनार्थावतारे क्षणं शैशवाभिनये ऽपि तदानीमेव यौवनाविष्करणोक्तेः कुमारिणीं कुत्सितानसुरान्मारयितुं शीलवतीं च एवं देवीविषयमहामन्त्रं लब्ध्वा तेन ये देवीं प्रपद्यन्ते तेषां पुरतो देवी प्रत्यक्षीभूय तदीयमरणरूपस्वदेयफलकालपूर्वावधिं बोधयतीत्येतत् स्वर्गादिफलान्तरैः प्रलोभयतीत्येतच्च तत्रैव मन्त्राम्नानानन्तरमुक्तम् । साहैनमुवाचास्मिन् संवत्सरे मरिष्यस्यस्मिन्नयने ऽस्मिन्नृतावस्मिन्मासे ऽस्मिन्नर्द्धमासे ऽस्मिन्द्वादशरात्रे ऽस्मिन् षड्रात्रे ऽस्मिन्त्रिरात्रे ऽस्मिन्द्विरात्रे ऽस्मिन्नहोरात्रे ऽस्मिन्नहन्यस्यां रात्रावस्यां वेलायामस्मिन्मुहूर्ते मरिष्यस्येहि स्वर्गं लोकं गच्छ देवलोकं वा ब्रह्मलोकं वा क्षत्रलोकं वा विरोचमानामेहि योनिं प्रविशेत्युवाच । वक्तीत्यर्थः ब्रह्मलोकं ब्राह्मणजात्या तपःप्रभृतिभिर्लब्धव्यं लोकं, क्षत्रलोकं क्षत्रियजात्या प्रजापालनादिभिः प्राप्यं लोकं अस्मिन्नेव वा लोके विरोचमानामुत्कृष्टां ब्राह्मणादियोनिं प्रविश । एवं देव्या प्रलोभितानां प्रपन्नानां सांसारिकफलवैराग्येण मुक्तिप्रार्थनं उक्तप्रार्थनमात्रेण रात्र्युपासकानामेतावदेव मुक्तिसाधनं नान्यदपेक्षणीयमित्येतच्च तदनन्तरमाम्नातं नाहं प्रवेक्ष्यामि भूतोक्तमायाब्रह्मणो दुहितुस्संरागवस्त्रायाः जायते म्रियते सन्धीयते च, रात्रिस्तु मा पुनातु रात्रिः खमेतत् पुष्पान्तं यत् पुराणमाकाशं तत्र मे स्थानं कुर्वपुनर्भवायापुनर्जन्मने एतावदेव रात्रौ रात्रेर्व्रतं चेति भूतेषु श्रेष्ठायास्संरागवस्त्रायाः आर्तवेन रजसा संरक्तवस्त्रायाः ब्रह्मणः ब्रह्मजातेर्दुहितुर्योनिं न

प्रवेक्ष्यामि यतो योनिं प्रविष्टो जायते जातश्च म्रियते मृतश्च सन्धीयते देहान्तरेण सम्बध्यते किन्तर्हि फलमपेक्षितमित्याकाङ्क्षायां रात्रिस्त्वित्यादिस्तु शब्दो वैलक्षण्यार्थः रात्रिर्देवी मा पुनातु जन्मान्तरप्रापककर्मबन्धान्मुञ्चतु रात्रिरिति द्विरुक्तिरादरार्था, एवं परोक्षविषया प्रार्थिता देवी प्रत्यक्षविषया प्रार्थ्यते यत्पुराणमाकाशं परब्रह्मलोकरूपं एतत् खमाकाशं पुण्यस्य कर्मफलोपभोगस्थानस्यान्तं बहिर्भूतं तत्र तस्मिन्नाकाशे ब्रह्मलोके मम स्थानं कुरु स्थानान्तरेभ्यो विशेषं दर्शयति अपुनर्भवायास्य विवरणमपुनर्जन्मन इति उक्तमन्त्रेण मुक्त्यर्थं देवीप्रपदनेन किञ्चिदङ्गमस्ति नाप्युपवासादिव्रतान्तरसमुच्चयापेक्षास्तीत्याह एतावदिति एतावदेवकर्तव्यं नास्याङ्गान्तरं रात्रौ रात्रिदेवताविषये अथवा रात्राविदं प्रपदनं कर्तव्यमित्यर्थः रात्रेव्रतञ्चैतावदेव नोपवासाद्यन्यदपेक्ष्यमस्तीत्यर्थः इति शब्दः खण्डसमाप्त्यर्थः ॥ १७ ॥

देशकालेषु दुष्टेषु देवीचन्द्रकलास्तुतिः ।
सन्ध्ययोरनुसन्धेया सर्वापद्विनिवृत्तये ॥

इति श्रीमद्भारद्वाजकुमजलधिकौस्तुभ श्रीकण्ठमतप्रतिष्ठापनाचार्य चतुरधिकशतप्रबन्धनिर्वाहक महाव्रतयाजि श्रीमदप्पय्यदीक्षितेन्द्राणां कृतिष्वन्यतमा दुर्गाचन्द्रकलास्तुतिः समाप्ता ॥

॥ ओं सर्वं शिवम् ॥